# दत्तात्रेया तव शरणम्

Dattatreya Tav Sharanam — Shri Dattatreya Sharanashtak

दत्तात्रेया तव शरणम् ।
दत्तनाथा तव शरणम् ॥
त्रिगुणात्मका त्रिगुणातीता
त्रिभुवनपालक तव शरणम् ॥१ ॥

शाश्वतमूर्ते तव शरणम् ।
श्यामसुंदरा तव शरणम् ॥
शेषाभरणा शेषभूषणा
शेषशायि गुरु तव शरणम् ॥२ ॥

षड्भुजमूर्ते तव शरणम् ।
षड्भुजयतिवर तव शरणम् ॥
दंडकमंडलु गदापद्मकर
शंखचक्रधर तव शरणम् ॥३ ॥

करुणानिधे तव शरणम् ।
करुणासागर तव शरणम् ॥
श्रीपादश्रीवल्लभ गुरुवर
नृसिंहसरस्वति तव शरणम् ॥४ ॥

श्रीगुरुनाथा तव शरणम् ।

सद्गुरुनाथा तव शरणम् ॥

कृष्णासंगमतरुवरवासी

भक्तावत्सला तव शरणम् ॥५ ॥

कृपामूर्ते तव शरणम् ।

कृपासागरा तव शरणम् ॥

कृपाकटाक्षा कृपावलोकना

कृपानिधे प्रभु तव शरणम् ॥६ ॥

कालांतका तव शरणम् ।

कालनाशका तव शरणम् ॥

पूर्णानंदा पूर्णपरेशा

पुराणपुरुषा तव शरणम् ॥७ ॥

जगदीशा तव शरणम् ।

जगन्नाथा तव शरणम् ॥

जगत्पालका जगदाधीशा

जगदुद्धारा तव शरणम् ॥८ ॥

अखिलांतरा तव शरणम् ।

अखिलैश्वर्या तव शरणम्॥

भक्तप्रिया वज्रपंजरा

प्रसन्नवक्त्रा तव शरणम् ॥९ ॥

दिगंबरा तव शरणम् ।

दीनदयाघन तव शरणम् ॥

दीनानाथा दीनदयाळा

दीनोद्धारा तव शरणम् ॥१० ॥

तपोमूर्ते तव शरणम् ।

तेजोराशी तव शरणम् ॥

ब्रह्मानंदा ब्रह्मसनातन

ब्रह्ममोहना तव शरणम् ॥११ ॥

विश्वात्मका तव शरणम् ।

विश्वरक्षका तव शरणम् ॥

विश्वंभरा विश्वजीवना

विश्वपरात्पर तव शरणम् ॥१२ ॥

विघ्नांतका तव शरणम् ।

विघ्ननाशका तव शरणम् ॥

प्रणवातीत प्रेमवर्धना

प्रकाशमूर्ते तव शरणम् ॥१३ ॥

निजानंदा तव शरणम् ।

निजपददायका तव शरणम् ॥

नित्यनिरंजन निराकारा

निराधारा तव शरणम् ॥१४ ॥

चिद्घनमूर्ते तव शरणम् ।

चिदाकारा तव शरणम् ॥

चिदात्मरूपा चिदानंदा

चित्सुखकंदा तव शरणम् ॥१५ ॥

अनादिमूर्ते तव शरणम् ।

अखिलावतारा तव शरणम् ॥

अनंतकोटिब्रह्मांडनायका

अघटितघटना तव शरणम् ॥१६ ॥

भक्तोद्धारा तव शरणम् ।

भक्तरक्षका तव शरणम् ॥

भक्तानुग्रहभक्तिप्रिया

पतितोद्धारा तव शरणम् ॥१७॥